# सावित्री भाई फुले

**प्रश्नः 1. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–**(निम्नलिखित प्रश्नों के उत्तर लिखिए–)

(क) महाराष्ट्रस्य प्रथमा महिला शिक्षिका का आसीत्?
(ख) कस्य समुदायस्य बालिकानां कृते सावित्री अपरं विद्यालयं प्रारब्धवती?
(ग) कीदृशीनां कुरीतीनां सावित्री विरोधम् अकरोत्।
(घ) किमर्थं शीर्णवस्त्रावृताः नार्यः कूपात् जलं ग्रहीतुं वारिताः?
(ङ) सावित्र्याः मृत्युः कथम् अभवत्?
(च) तस्याः द्वयोः काव्यसङ्कलनयोः नामनी के?

**उत्तरम्–** (क) महाराष्ट्रस्य प्रथमा महिला शिक्षिका सावित्री बाई फुले आसीत्।
(ख) अस्पृश्यत्वात् तिरस्कृतस्य समुदायस्य बालिकानां कृते सावित्री अपरं विद्यालयं प्रारब्धवती।
(ग) सामाजिक–कुरीतीनां सावित्री विरोधम् अकरोत्।
(घ) निम्नजातिषु जन्मकारणात् शीर्णवस्त्रावृताः नार्यः कूपात् जलं ग्रहीतुं वारिताः।
(ङ) महारोगप्लेगस्य प्रसारकाले सेवारता सावित्री स्वयमेतेन (स्वयम्+एतेन) असाध्यरोगेण ग्रस्ता सती मृत्युं प्राप्तवती।
(च) तस्याः द्वयोः काव्यसङ्कलनयोः नामनी 'काव्यफुले' 'सुबोधरत्नाकरः' च इति स्तः।

**प्रश्नः 2. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत–**(निम्नलिखित पदों के आधार पर वाक्यों की रचना कीजिए–)

स्वकीयम् – ..............................................................
सविनोदम् – ..............................................................
सक्रिया – ..............................................................
प्रदेशस्य – ..............................................................
मुखरम् – ..............................................................
सर्वथा – ..............................................................

**उत्तरम्–**

| **शब्द** | **अर्थ** | **वाक्य** |
|---|---|---|
| स्वकीयम् | (अपना) | सावित्री **स्वकीयम्** कर्म सदैव अकरोत्। |
| सविनोदम् | (प्रसन्नता के साथ) | सोहनः **सविनोदम्** दिनम् व्यतीतयत्। |
| सक्रिया | (सक्रिय) | सावित्री नारीशिक्षार्थं **सक्रिया** आसीत्। |
| प्रदेशस्य | (प्रदेश की) | सावित्री सदैव **प्रदेशस्य** सेवाम् अकरोत्। |
| मुखरम् | (प्रखर) | सावित्री अत्याचारस्य **मुखरम्** विरोधम् अकरोत्। |
| सर्वथा | (पूरी तरह) | नारी शिक्षार्थं सा **सर्वथा** समर्पिता आसीत्। |

**प्रश्नः 3. अधोलिखितानां पदानां विलोमपदानि लिखत–**(निम्नलिखित पदों के विपरीतार्थक पद लिखिए–)

उपरि ..........................
आदानम् ..........................
परकीयम् ..........................
विषमता ..........................
व्यक्तिगतम् ..........................
आरोहः ..........................

**उत्तरम्–**

| | |
|---|---|
| उपरि | अधः |
| आदानम् | प्रदानम् |
| परकीयम् | स्वकीयम् |
| विषमता | समानता |
| व्यक्तिगतम् | सार्वजनिकम् |
| आरोहः | अवरोहः |

**प्रश्नः 4. अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनं च लिखत**–(निम्नलिखित पदों के लिङ्ग, विभक्ति और वचन लिखिए–)

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| धूलिम् | ................ | ................ | ................ |
| नाम्नि | ................ | ................ | ................ |
| अपरः | ................ | ................ | ................ |
| कन्यानाम् | ................ | ................ | ................ |
| सहभागिताम् | ................ | ................ | ................ |
| नापितैः | ................ | ................ | ................ |

**उत्तरम्–**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| धूलिम् | स्त्रीलिङ्गम् | द्वितीया | एकवचनम् |
| नाम्नि | नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| अपरः | पुंल्लिगम् | प्रथमा | एकवचनम् |
| कन्यानाम् | स्त्रीलिङ्गम् | षष्ठी | बहुवचनम् |
| सहभागिताम् | स्त्रीलिङ्गम् | द्वितीया | एकवचनम् |
| नापितैः | पुंल्लिगम् | तृतीया | बहुवचनम् |

**प्रश्नः 5. उदाहरणमनुसृत्य लकारपरिवर्तनं कुरुत**–(उदाहरण के अनुसार लकार परिवर्तन कीजिए–)

| वर्तमानकालः | अतीतकालः |
|---|---|
| **यथा**– सा शिक्षिका अस्ति। | सा शिक्षिका आसीत्। |
| (क) सा अध्यापने संलग्ना भवति। | ................................................ |
| (ख) सः त्रयोदशवर्षकल्पः अस्ति। | ................................................ |
| (ग) महिलाः तडागात् जलं नयन्ति। | ................................................ |
| (घ) वयं प्रतिदिनं पाठं पठामः। | ................................................ |
| (ङ) किं यूयं विद्यालयं गच्छथ? | ................................................ |
| (च) ते बालकाः विद्यालयात् गृहं गच्छन्ति। | ................................................ |

**उत्तरम्–** (क) सा अध्यापने संलग्ना अभवत्।

(ख) सः त्रयोदशवर्षकल्पः आसीत्।

(ग) महिलाः तडागात् जलम् अनयन्।

(घ) वयं प्रतिदिनं पाठम् अपठाम।

(ङ) किं यूयं विद्यालयम् अगच्छत।

(च) ते बालकाः विद्यालयात् गृहम् अगच्छन्।

## अतिरिक्त-अभ्यासः

**(1) गद्यांशं पठित्वा अधोदत्तान् प्रश्नान् उत्तरत**–(गद्यांश पढ़कर नीचे दिए गए प्रश्नों के उत्तर दीजिए–)

एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमानं सोढुं नाशक्नोत्। सा ताः स्त्रियः निजगृहं नीतवती। तडागं दर्शयित्वा अकथयत् च यत् यथेष्टं जलं नयत। सार्वजनिकोऽयं तडागः। अस्मात् जलग्रहणे नास्ति जातिबन्धनम्। तया मनुष्याणां समानतायाः स्वतन्त्रतायाश्च पक्षः सर्वदा सर्वथा समर्थितः।

**I. एकपदेन उत्तरत।**

1. के जलोद्धरणम् अवारयन्? ______________
2. शीर्णवस्त्रावृताः स्त्रियः किं पातुम् इच्छन्ति स्म? ______________
3. सावित्री ताः स्त्रियः कुत्र नी-त-वती? ______________
4. सावित्री ताः गृहं नीत्वा किम् अदर्शयत्?

**II. पूर्णवाक्येन उत्तरत।**

1. सावित्री शीर्णवस्त्रावृताः महिलाः कुत्र अपश्यत्?....................
2. सावित्री कीदृशंम् अपमानं सोढुं न अशक्नोत्?..................
3. तडागं दर्शयित्वा सा ताः महिलाः किम् अकथयत्?..................

**III. भाषिककार्यम्**

1. 'सार्वजनिकोऽयं तडागः'– अत्र विशेष्यपदम् किम्? ________
2. समानार्थकम् चित्वा लिखत– (i) स्त्रियः = ________ (ii) अनयत्
3. उपसर्गं निर्दिशत। (i) अपमानम् ________ (ii) उपहासम्............
4. सन्धिं विच्छेदं वा कुरुत।
   (i) जलोद्धरणम् = ________ + ________ (ii) न + अशक्नोत् = ............
5. यथानिर्देशम् रिक्तस्थानानि पूरयत।
   (i) समानतायाः ______ लिङ्गम् ______ विभक्तिः ______ वचनम्
   (ii) नार्यः ______ लिङ्गम् ______ विभक्तिः ______ वचनम्
   (iii) नयत ______ धातुः ______ लकारः ______ पुरुषः ______ वचनम्
   (iv) याचन्ते ______ धातुः ______ लकारः ______ पुरुषः ______ वचनम्

**उत्तरम्–**

**I.** 1. उच्चवर्गीयाः 2. जलम् 3. निजगृहम् 4. तडागम्

**II.** 1. सावित्री मार्गे कूपं निकषा शीर्णवस्त्रावृताः महिलाः अपश्यत्।

2. उच्चवर्गीयाः निम्नजातीयाः स्त्रीणाम् उपहासम् अकुर्वन्, सावित्री एतत् अपमानम् सोढुं न अश्क्नोत्।

3. सा ताः महिलाः अकथयत्–यथेष्टं जलं नयत; अत्र जलग्रहणे नास्ति जातिबन्धनम्।

**III.** 1. तडागः 2. (i) नार्यः (ii) नीतवती 3. (i) अप (ii) उप

4. (i) जल + उद्धरणम् (ii) नाशक्नोत्

5. (i) स्त्री, षष्ठी, एकवचनम् (ii) स्त्री, प्रथमा, बहुवचनम्

(iii) नी, लोट्, मध्यम, बहुवचनम् (iv) याच्, लट्, प्रथम-पुरुषः, बहुवचनम्

**( 2 ) परस्परं मेलयत लिखत च–**(परस्पर मेल कीजिए और लिखिए–)

**समानार्थकानि** / **विपरीतार्थकानि**

| | | | | |
|---|---|---|---|---|
| **( क )** | सततम् | विवाहिता | **( ख )** समानता | निराकरणम् |
| | तिरस्कारः | जन्म अलभत | निम्नजातीयाः | अन्तिमः |
| | परिणीता | अविरतम् | आदाय | विषमता |
| | अजायत | पठनम् | स्वीकरणम् | प्रदाय |
| | अध्ययनम् | अपमानः | प्रथमः | उच्चजातीयाः |

**उत्तरम्–** (क) सततम्–अविरतम्; तिरस्कारः–अपमानः, परिणीता–विवाहिता; अजायत–जन्म अलभत; अध्ययनम्–पठनम्।

(ख) समानता–विषमता; निम्नजातीयाः–उच्चवर्गीयाः, आदाय–प्रदाय; स्वीकरणम्–निराकरणम् प्रथमः–अन्तिमः।

**( 3 ) अधोदत्तानां पदानां वाक्यप्रयोगं कुरुत–**(निम्नलिखित पदों का वाक्यप्रयोग कीजिए–)

1. सर्वदा ........................................................................
2. विरोधम् ........................................................................
3. स्त्रीशिक्षायाः ........................................................................
4. संस्थाः ........................................................................
5. प्रथमम् ........................................................................

**उत्तरम्–** 1. महापुरुषाः सर्वदा जनकल्याण–कार्येषु रताः।

2. वयम् अस्पृश्यतायाः विरोधं कुर्मः।

3. सावित्री बाई स्त्रीशिक्षायाः समर्थनम् अकरोत्।

4. सा अनेकाः संस्थाः सञ्चालयति स्म।

5. अहं कविता-प्रतियोगितायाम् प्रथमं पुरस्कारम् अविन्दम्।

**( 4 ) मञ्जूषायाः सहायतया कथायां रिक्त स्थानानि पूरयत–**(मंजूषा की सहायता से कहानी के रिक्त स्थान पूरे कीजिए–)

एकदा सावित्र्या ............... दृष्टंयत् कूपं ............... शीर्ण वस्त्रः वृताः काश्चित् ...... ........ जलम् पातुं याचन्ते स्म। उच्चवर्गीयाः ............... कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् ............... सोढुं नाशक्नोत्। सा ताः स्त्रियः ............... नीतवती। ............... दर्शयित्वा अकथयत् च यत् यथेष्टं ............... नयत।

| निजगृहम्, उपहासम्, कूपम्, निकषा, मार्गे, जलम्, नार्यः अपमानम् |
|---|

**उत्तरम्–** मार्गे, निकषा, नार्यः, उपहासम्, अपमानम्, निजगृहम्, कूपम्, जलम्।

## बहुविकल्पीयप्रश्नाः

**(1) प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा वाक्यपूर्तिं कुरुत**–(दिए गए विकल्पों में से उचित पद चुनकर वाक्यपूर्ति कीजिए–)

1. इयं प्रबन्धन-समितिः ______ कौशलेन सञ्चालयति। (विद्यालयस्य, विद्यालये, विद्यालयम्)
2. ______ जनाः भ्रष्टाचारणेन व्याकुलाः सन्ति। (सर्वाः, सर्वः, सर्वे)
3. सावित्री बाई स्वदृढनिश्चयात् न ______ । (विचलत्, विचलति स्म, अविचलत्)
4. उच्चवर्गीयाः तासां स्त्रीणाम् ______ अकुर्वन्। (उपहासः, उपहासम्, उपहास)
5. अस्य मण्डलस्य ______ किम् आसीत्? (उद्देश्य, उद्देश्यः, उद्देश्यम्)
6. देशस्य ______ वीराः प्राणान् अपि त्यजन्ति। (रक्षाय, रक्षायै, रक्षायाः)
7. ते ______ जलोद्धरणम् निवारयन्ति स्म। (कूपेन, कूपम्, कूपात्)

**उत्तरम्–** 1. विद्यालयम् 2. सर्वे 3. विचलति स्म 4. उपहासम्
5. उद्देश्यम् 6. रक्षायै 7. कूपात्

**(2) उचितं विकल्पं प्रयुज्य प्रश्ननिर्माणम् कुरुत**–(उचित विकल्प का प्रयोग करके प्रश्ननिर्माण कीजिए–)

1. सा स्वविद्यालये कन्याभिः सविनोदं आलपति। (कीदृशम्, कथं, केन)
2. कश्चित् जनः सावित्र्याः उपरि धूलिम् क्षिपति। (कस्य, कस्याः, कस्याम्)
3. सा अध्यापने संलग्ना। (कस्याम्, कस्मिन्, केन)
4. नववर्षदेशीया सा फुलेमहोदयेन परिणीता। (कम्, केन, कस्य)
5. बालिकानां कृते सा अपरं विद्यालयम् आरभत। (केषाम्, कस्स, कासाम्)

**उत्तरम्–** 1. सा स्वविद्यालये कन्याभिः कथं आलपति?
2. कश्चित् जनः कस्याः उपरि धूलिम् क्षिपति?
3. सा कस्मिन् संलग्ना?
4. नववर्षदेशीया सा केन परिणीता।
5. कासां कृते सा अपरं विद्यालयम् आरभत।